# Sachinandana Ashtakam

# સચિનન્દનાષ્ટકમ્

## Document Information

Text title : sachinandanAShTakam

File name : sachinandanAShTakam.itx

Category : vishhnu, krishna, aShTaka

Location : doc_vishhnu

Author : Narahari Sarkar

Latest update : September 19, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 19, 2020

*sanskritdocuments.org*

# સચિનન્દનાષ્ટકમ્

ગોપીનાં કુચકુઙ્કુમેન નિચિતં વાસઃ કિમસ્યારુણં
    નિન્દત્કાઞ્ચનકાન્તિરાસરસિકાશ્લેષેણ ગૌરં વપુઃ ।
તાસાં ગાઢકરાભિબન્ધનવશાલ્લોમોદ્ગમો દૃશ્યતે
    આશ્ચર્યં સખિ પશ્ય લમ્પટગુરોઃ સન્ન્યાસવેષં ક્ષિતૌ ॥ ૧॥

યઃ પૂર્વં વ્રજસુન્દરીરતિરસૈરુત્થાપિતઃ પ્રત્યહં
    કાલિન્દીપુલિને નનર્ત રભસાત્ શ્રીરાસગોષ્ઠ્યાં વિભુઃ ।
સોઽયં સમ્પ્રતિ સર્વલોકનિહિતપ્રેમાનુરાગઃ કલૌ
    પ્રેમ્ણા નૃત્યતિ નર્તયત્યપિ જગદ્ભૂદેવચૂડામણિઃ ॥ ૨॥

વેદાન્તાગમવેદશાસ્ત્રપટલીદુર્ગમ્યપાદામ્બુજઃ
    શ્રીશ્રીનન્દકિશોરલાસ્યલહરીવિદ્યોતકાનુગ્રહઃ ।
તત્કાલસ્મૃતિમાત્રતત્ક્ષણવલત્પ્રેમપ્રવાહામ્બુધિ-
    ર્ભૂદેવાઙ્ગણામઙ્ગલો વિજયતે શ્રીશ્રીશચીનન્દનઃ ॥ ૩॥

મોહોન્માદરસેન ગોપવનિતાસિક્તેન વૃન્દાવનં
    યઃ પૂર્વં જગદેકમઙ્ગલમલં ચક્રે ઘનશ્યામલઃ ।
સોઽયં ગૌરહરિઃ સમસ્તજગતીં પ્રેમ્ણા સમુલ્લાસયન્
    કારુણ્યૈકનિકેતનં વિજયતે ગૌડાવનીમણ્ડલે ॥ ૪॥

નૃત્યાવેશમહોલ્લસત્સુમધુરપ્રત્યઙ્ગવેશોજ્જ્વલં
    શ્રીખણ્ડાગુરુકુઙ્કુમાદિસહિતં શ્રીમદ્બૃહદ્વક્ષસા ।
કર્પૂરોદ્ભટપૂગપુઞ્જવિલસત્પ્રારક્તબિમ્બાધરં
    શ્રીચૈતન્યમહાપ્રભોર્વિજયતે લાવણ્યસારં વપુઃ ॥ ૫॥

પ્રતપ્તકનકપ્રભં વિમલપૂર્ણચન્દ્રાનનં
    ગલન્નયનવારિભિઃ સપદિ સિક્તભૂમીતલમ્ ।
સગદ્ગદગિરં મુદા સકલદેવચૂડામણિં
    શચીસુતમહં ભજે કરુણસાગરમીશ્વરમ્ ॥ ૬॥

કદમ્બકુસુમોલ્લસત્પુલકપુઞ્જપુઞ્જોજ્જ્વલં
ઝલત્ઝલદિતિ સ્ખલન્નયનવારિભિર્નિર્ઝરમ્ ।
વયં દમદમાયિતે હૃદિ દરસ્ફુરન્માધુરી
મધૂન્મદમહાનટં કિમપિ ધામ વન્દામહે ॥ ૭॥

ઉચ્ચૈર્લોલભુજદ્વયેન પરિતઃ સ્વર્લોકમાહ્લાદયન્
પ્રેમ્ણા પૂરિતકણ્ઠગદ્ગદહરિધ્વાનૈર્ભુવં મોહયન્ ।
ચઞ્ચત્પાદવિહારિનૂપુરરવૈર્નાગાન્ મુદા મીલયન્
નિત્યાનન્દમહાપ્રભુર્વિજયતે શ્રીમલ્લવેશોજ્જ્વલઃ ॥ ૮॥

કૃષ્ણો દેવઃ કલિયુગભવં લોકમાલોક્ય સર્વં
પાપાસક્તં સમજનિ કૃપાસિન્ધુચૈતન્યમૂર્તિઃ ।
તસ્મિન્ યેષાં ન ભવતિ સદા કૃષ્ણબુદ્ધિર્નરાણાં
ધિક્તાન્ ધિક્તાન્ ધિગિતિ ધિગિતિ વ્યાહરેત્ કિં મૃદઙ્ગઃ ॥ ૯॥

ઇતિ શ્રીનરહરીસરકારવિરચિતં સચિનન્દનાષ્ટકં સમ્પૂર્ણમ્ ।

*Sachinandana Ashtakam*
pdf was typeset on September 19, 2020

Please send corrections to *sanskrit@cheerful.com*